भावविरोधे ग्रहरिपुभावे चाचिरेण रोगादिः। इति ग्रहयोटकविचारः ॥ * ॥ अन्ये योटकाः ग्रपञ्चभयान्न लिखिताः। इति ज्योतिषम् ॥ ग्रन्थान्तरे जोटकशब्दस्य वर्गतृतीयादित्वं ॥

योतुः, पुं, ( यूयते ज्ञायते अनेनेति। यु + बाहुलकात् तुः। ) परिमाणम्। इत्युणादिकोषः ॥

योत्रं, क्ली, ( यूयते अनेनेति। यु + "दाम्नीशस यु युजस्तु तुद सि सिच मिह-पतदंश-नहः करणे।" ३। २। १८२। इति ष्ट्रन्।) योक्त्रम्। इत्यमरः। २। ६। १३॥ ( यथा, गौ० रामायणे। २। ४५। २६।

"भरतायाभिरुद्धाः स्म योत्राय पशवो यथा॥")

योद्धा, [ ऋ ] पुं, (युध्यतीति। युध् + तृच्।) युद्धकर्त्ता। तत्पर्य्यायः। भटः २ योधः ३। इत्यमरः। २। ८। ६१॥ ( यथा, हरिवंशे भविष्यपर्व्वणि। २। १८।

"बाधिष्यते पुरीं योद्धा छिद्रं यदि लभेत सः॥")

योधः, पुं, ( युध्यतीति। युध् + अच्।) योद्धा। इत्यमरः। २। ८। ६१॥ ( यथा, कथासरित्सागरे। १२। २२।

"सङ्केतमिलितैश्चान्यैर्योधास्तैः सैनिकैः सह।
निम्युर्वेतसेश्वरं चक्रमहासेनान्तिकञ्च तत्॥")

योधनं, क्ली, युद्धम्। ( यथा, मार्कण्डेये।१३५।१७।

"योधनेषु स्वरूपेण दमो यस्य दुरात्मनः।
स-दमो वारयत्येव हन्ति तस्य रिपोर्गुरुम्॥")

अस्त्रम्॥ युधधातोर्भावे करणे चानट् ( ल्युट् ) प्रत्ययेन निष्पन्नम्।

योधसंरावः, पुं, ( योधानां संरावः। ) अन्योन्यं योधानां युद्धायाह्वानम्। तत्पर्य्यायः। क्रन्दनम् २। इत्यमरभरतौ॥

योधेयः, पुं, ( युध् + भावे घञ्। योधं युद्धं करोतीति। योध + खः।) योद्धा। योधशब्दात् खेयप्रत्ययेन निष्पन्नः॥

योनलः, पुं, ( यवस्य नल इव नलः काण्डोऽस्य। पृषोदरादिः।) शस्यविशेषः। तत्पर्य्यायः। यवनालः २ जूर्णाह्वयः ३ देवधान्यम् ४ जोन्नाला ५ बीजपुष्पिका ६। इति हेमचन्द्रः। ४। २४४॥

योनिः, पुं, स्त्री, ( यौति संयोजयतीति। यु + "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्।" उणा० ४। ५१। इति निः।) आकरः। इति मेदिनी। ने, १६॥ कारणम्। ( यथा, उत्तररामचरिते। ६।

"ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः।
सा योनिः सर्व्ववैराणां सा हि लोकस्य निर्ऋतिः॥")

जलम्। इति हेमचन्द्रः। ३। २४६॥ ( कुशद्वीपस्थनदीविशेषः। यथा, मार्कण्डेये।१२१।७१।

"धूतपापा नदी नाम योनिश्चैव पुनः स्मृता।
सीता द्वितीया विज्ञेया सा चैव हि निशास्मृता॥"

तन्त्रशास्त्रविशेषः। यथा, महासिद्धिसारस्वते।

"सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम्।
तन्त्रान्तरञ्च देवेशि! नवरत्नेश्वरं तथा॥")

प्राणिनामुत्पत्तिस्थानम्। इति त्रिकाण्डशेषः॥ तत्तु चतुरशीतिलक्षप्रकारम्। यथा,—

"चतुरशीतिलक्षाणि चतुर्भेदाश्च जन्तवः।
अण्डजाः स्वेदजाश्चैव उद्भिज्जाश्च जरायुजाः॥
एकविंशतिलक्षाणि ह्यण्डजाः परिकीर्त्तिताः।
स्वेदजाश्च तथैवोक्ता उद्भिज्जास्तत्प्रमाणतः॥
जरायुजाश्च तावन्तो मनुष्याद्याश्च जन्तवः।
सर्व्वेषामेव जन्तूनां मानुषत्वं सुदुर्लभम्॥"

इति श्रीगरुड़पुराणे प्रेतकल्पे धर्म्मप्रकटनो नाम २ अध्यायः॥ * ॥ अन्यच्च।

"जलजा नव लक्षाणि स्थावरा लक्षविंशतिः।
कृमयो रुद्रसङ्ख्याकाः पक्षिणां दशलक्षकम्॥
त्रिंशल्लक्षाणि पशवश्चतुर्लक्षाणि मानुषाः।
सर्व्वयोनिं परित्यज्य ब्रह्मयोनिं ततोऽभ्यगात्॥"

इति वृहद्विष्णुपुराणम्॥ * ॥

अपि च।

"स्थावरास्त्रिंशल्लक्षञ्च जलजो नवलक्षकः।
कृमिजा दशलक्षञ्च रुद्रलक्षञ्च पक्षिणः॥
पशवो विंशलक्षञ्च चतुर्लक्षञ्च मानवाः।
एतेषु भ्रमणं कृत्वा द्विजत्वमुपजायते॥"

इति कर्म्मविपाकः॥

( "भूतानाञ्चतुर्व्विधा योनिर्भवति जरायुण्डस्वेदोद्भिदः। तासां खलु चतसृणामपि योनीनामेकैका योनिरपरिसङ्ख्येयभेदा भवति भूतानामाकृतिविशेषापरिसङ्ख्येयत्वात्। तत्र जरायुजानामण्डजानां प्राणिनामेते गर्भकरा भावा यां यां योनिमापद्यन्ते तस्यां तस्यां योनौ तथा तथा रूपा भवन्ति। तद्यथा कनकरजतताम्रत्रपुसीसा आसिच्यमानास्तेषु तेषु मधूच्छिष्टबिम्बेषु। ते यदा मनुष्यबिम्बमापद्यन्ते तदा मनुष्यविग्रहेण जायन्ते। तस्मात् समुदायात्मकः सन् गर्भो मनुष्यविग्रहेण जायते मनुष्यो मनुष्यप्रभव इत्युच्यते तद्योनित्वात्।" इति चरके शारीरस्थाने तृतीयेऽध्याये॥ * ॥)

भगम्। इत्यमरः।२।६।७६॥ तत्पर्य्यायः। वराङ्गम् २ उपस्थः ३ स्मरमन्दिरम् ४। इति राजनिर्घण्टः॥ रतिगृहम् ५ जन्मवर्त्म ६ अधरम् ७ अवाच्यदेशः ८ प्रकृतिः ९ अपथम् १० स्मरकूपकः ११ अप्रदेशः १२ प्रकृतिः १३ पुष्पी १४ संसारमार्गकः १५ संसारमार्गः १६ गुह्यम् १७ स्मरागारम् १८ स्मरध्वजम् १९ रत्यङ्गम् २० रतिकुहरम् २१ कलत्रम् २२ अधः २३। इति शब्दरत्नावली॥ रतिमन्दिरम् २४ स्मरगृहम् २५ कन्दर्पकूपः २६ कन्दर्पसम्बाधः २७ कन्दर्पसन्धिः २८ स्त्रीचिह्नम् २९। इति जटाधरः॥ स तु गर्भस्थायाः सप्तभिर्मासैर्भवति। इति सुखबोधः॥ * ॥ तस्य लक्षणं यथा,—

"शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः।
वामोन्नतश्चेत् कन्याजः पुत्रजो दक्षिणोन्नतः॥
आखुरोमा गूढमणिः सुश्लिष्टः संहतः पृथुः।
तुङ्गः कमलवर्णाभः शुभोऽश्वत्थदलाकृतिः॥
कुरङ्गखुररूपो यश्चुल्लिकोदरसन्निभः।
रोमशो विवृतास्यश्च दृश्यनासोऽतिदुर्भगः॥
शङ्खावर्त्तो भगो यस्याः सा गर्भमिह नेच्छति।
चिपिटः कर्परकारः किङ्करीपददो भगः॥
वंशवेतसपत्राभो गजरोमोच्चनासिकः।
विकटः कुटिलाकारो लम्बगल्लस्तथाशुभः॥"

इति काशीखण्डे ३७ अध्यायः॥ * ॥

अपि च।

"शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्त्तिता।
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता॥" * ॥

अथ योनिरोगाधिकारः।

"तत्र योनिरोगाणां निदानान्याह।
'मिथ्याहारविहाराभ्यां दुष्टैर्दोषैः प्रदूषितात्।
आर्त्तवादीर्य्यतश्चापि दैवाद्वा स्युर्भगे गदाः॥'
रोगिणीनां योनीनां नामान्याह।
'उदावर्त्ता तथा बन्ध्या विप्लुता च परिप्लुता।
वातला योनयो रुग्णा वातदोषेण पञ्चधा॥
पञ्चधा पित्तदोषेण तत्रादौ लोहितक्षरा।
प्रस्रंसिनी वामिनी च पुत्रघ्नी पित्तला तथा॥
अत्यानन्दा कर्णिनी च चरणानन्दपूर्व्विका।
अतिपूर्व्वापि सा ज्ञेया श्लेष्मला च कफोद्भिमाः॥
खण्डशिखनी च महती सूचीवक्त्रा त्रिदोषिणी।
पञ्चैता योनयः प्रोक्ताः सर्व्वदोषप्रकोपतः॥'
अथ तासां लक्षणान्याह।
'सा फेणिलमुदावर्त्ता रजःकृच्छ्रेण मुञ्चति।
बन्ध्या नष्टार्त्तवा ज्ञेया विप्लुता नित्यवेदना॥
परिप्लुता या भवति ग्राम्यधर्म्मे रुजा भृशम्।
वातला कर्कशा स्तब्धा शूलनिस्तोदपीड़िता॥
चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः॥'
अनिलवेदनास्तोदादयः॥ वातलायां त्वतिशयिता वातवेदना बोद्धव्या। वातला इत्यन्वयात्॥ * ॥
'सदाहं क्षरते रक्तं यस्याः साः लोहितक्षरा।
प्रस्रंसिनी स्रंसते च क्षोभिता दुःप्रजायिनी॥'
क्षोभिता विमर्द्दिता स्रंसते स्वस्थानात् च्यवते दुःप्रजायिनी दुष्प्रजननशीला।
'सवातमुद्गिरेद्बीजं वामिनी रजसा युतम्।
स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी रक्तसंस्रवात्॥'
पुत्रशब्दोऽत्रापत्योपलक्षकः।
'अत्यर्थं पित्तला योनिर्दाहपाकज्वरान्विता।
चतसृष्वपि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत्॥'
अत्यानन्दा न सन्तोषं ग्राम्यधर्म्मेण विन्दति।
कर्णिन्यां कर्णिका योनौ श्लेष्मासृग्भ्यां प्रजायते॥'
कर्णिका मांसस्य कर्णिकारो ग्रन्थिः॥
'मैथुने चरणापूर्व्वं पुरुषादतिरिच्यते।'
अतिरिच्यते रजो मुञ्चति इत्यर्थः।
'बहुशश्चातिचरणा तयोर्व्वीजं न तिष्ठति॥'
बहुशः वारं वारं अतिरिच्यते तयोः चरणातिचरणयोः।
'श्लेष्मला पिच्छिला योनिः कण्डुयुक्तातिशीतला।